दितालिनि शीते निर्व्वार मधुनीन्द्रियवर्गः” एकशो यथा। “मन्दमन्दविगलत्त्रपमोषञ्चञ्चुरुल्लसितपक्ष्म दधत्या। वीक्ष्यते स्म शनकैर्नववध्वा कामिनो मुखमधोमुखयेव” सुखादिविषयं मानसं यथा अस्तोकविस्मयमविस्मृत पूर्व्ववृत्तमुद्भूतनूतनभयज्वरजर्ज्जरं नः। एकशस्तुटित संघटितप्रमोदमानन्दसेकशबलत्वमुपैति चेतः „।

६९ प्रत्यनीकम् “प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः” च० “जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधःकृतौ”।

७० प्रस्तुताङ्कुरः “प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः”। च० किं भृङ्ग! सत्यां मालत्यां केतक्या कण्टकस्थया”।

७१ प्रहर्षणम् “उत्कण्ठितार्थसंसिद्धिर्विना यत्नं प्रहर्षणम्१ वाञ्छितादधिकार्थस्य संसिद्धिश्च प्रहर्षणम्२। यत्नादुपायसिद्धार्थात् साक्षाल्लाभः फलस्य तत्३” च०। क्रमेण “तामेव ध्यायते तस्मै विसृष्टा सैव दूतिका”१ “दीपमुद्योपयेद्यावत्तावदभ्युदितो रविः” २ “निध्यञ्जनौषधीमूलं खनताऽऽसादितोनिधिः”। ३।

७२ प्रेयः “प्रेयः प्रियतराख्यानम्” दण्डी “अद्य या मम गोविन्द! जाता त्वयि गृहागते। कालेनैषा भवेत् प्रीतिस्तवैव गमनात् पुनः। इत्याह युक्तं विदुरो नान्यतस्तादृशी धृतिः। भक्तिमात्रसमाराध्यः स प्रीतश्च ततो हरिः” इदञ्च दर्पणकारादिभिरनुक्तमपि काव्यादर्शादावुक्तम्।

७३ प्रौढ़ोक्तिः “प्रौढोक्तिरुत्कर्षहेतौ तद्धेतुत्वप्रकल्पनम्” च०। “कचाः कलिन्दजातीरतमालस्तोममेचकाः”।

७४ भावः। ‘अभिप्रायानुकूल्ये तु प्रवृत्तिर्भाव उच्यते सोद्भेदोऽथ निरुद्भेदस्सैकतस्याभितस्य सः हृद्यं सूक्ष्मञ्च भिद्येत न हि भावात् कथञ्चन” तत्र प्रार्थनावेदनाभ्यामुद्भिद्यमानः सोद्भेदो भावो हृद्यमित्युच्यते। “निरुद्भेदस्तु यो भावः स सूक्ष्मस्तु निगद्यते। इङ्गिताकारलक्ष्यात् स सूक्ष्मात् स्याद्भूमिकान्तरमिति” स०कण्ठा०। स भावः भूमिकान्तरमवस्थान्तरम्। तत्र हृद्यभावयोरुदाहरणे तत्रैव दृश्ये सूक्ष्मस्य सूक्ष्मालङ्कारे वक्ष्यते।

७५ भाविकम् ‘अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यतः। यत् प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम्”२। सा०द० तत्र भूतस्य “मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ”। भाविनः “आसीदञ्जनमत्रेति पश्यामि तव लोचने। भाविभूषणसंभारां साक्षात्कुर्वे तवाकृतिम्”।

७६ भेदकातिशयोक्तिः ‘भेदकातिशयोक्तिः स्यात् तस्यैवान्यत्वकल्पनम्”च०।‘अन्यदेवास्य गाम्भीर्य्यमन्यद्धैर्य्यञ्च भूपते!।

७७ भ्रान्तापह्नुतिः ‘अन्यस्य शङ्कया भ्रान्तापह्नुतिः भ्रान्तिवारणे”। च० “तापं करोति सोत्कम्पं ज्वरः किन्नु? सखे! स्मरः”।

७८ भ्रान्तिमान् ‘साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थिता” सा०द० “मुग्धा दुग्धधिया गवां विदधते कुम्भानधो वल्लवाः कर्णे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि। कर्कन्धूफलमुच्चिनोति शवरी मुक्ताफलाशङ्कया सान्द्रा चन्द्रमसोन कस्य कुरुते चित्तभ्रमं चन्द्रिका” प्रतिभेतिविशेषणात् स्वरससिद्धे शुक्तिकायां रजतभ्रमे न। साम्यादित्युक्तेः ‘सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः। सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे” इत्यादौ त्रिभुवनवर्त्तियावद्वस्तुनः साम्याभावान्न भ्रान्तिमान्। अयं भ्रान्तिरित्यन्ये।

७९ मालादीपकम् “मालादीपकं पुनः। धर्म्मिणामेकधर्म्मेण सम्बन्धोयत् यथोत्तरम्” सा०द०। ‘त्वयि सङ्गरसंप्राप्ते धनुषासादिता शराः। शरैरिशिरस्तेन भूस्तया त्वं, त्वया यशः” अत्रासादनक्रियाधर्म्मस्य यथोत्तरं सम्बन्धः।

८० मिथ्याध्यवसितिः ‘किञ्चिन्मिथ्यार्थसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनम् मिथ्याध्यवसितिर्वेश्यां वशयेत् खस्रजं वहन्”।च० मिथ्यापह्नुतिस्तु अपह्नुतिभेदः।

८१ मीलितम् ‘मीलितं यदि सादृश्याद्भेद एव न दृश्यते”च० “रसोनालक्षि लाक्षायाश्चरणे सहजारुणे”।

८२ मुद्रा “सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः”। च० ‘नितम्बगुर्व्वी तरुणी दृग्युग्मविपुला च सा”।

८३ यथासंख्यम् “यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः” च० शत्रुं मित्रं विपत्तिं च जय रञ्जय भञ्जय”। क्रम इत्यन्ये

८४ युक्तिः “युक्तिः पराभिसन्धानं क्रियया मर्म्मगुप्तये” च०। “त्वामालिखन्ती दृष्टान्यां धनुः पौष्पं करेऽलिखत्”।

८५ रत्नावली ‘क्रमिकप्रकृतार्थानां न्यासं रत्नावलीं विदुः”च०। “चतुरास्यः पतिर्लक्ष्म्याः सर्व्वज्ञस्त्वं महीपते!”। चत्वारि आस्यानि चतुरं निपुणमास्यमास्यव्यापारो वचनं च यस्य।

८६ रसवत्। ‘रसवद्रसपेशलम्” दण्डी “रसेन पेशलमाख्यानमित्यनुषङ्गः रसवत्। ‘मृतेति प्रेत्य सङ्गन्तुं यया मे मरणं मतम्। सैषा तन्वी मया लब्धा कथमत्रैव जन्मनि” तत्समर्थनञ्च तत्रैव “प्राक् प्रतिदर्शिता सेयं रतिः शृङ्गारतां गता। रूपबाहुल्ययोगेन तदिदं रसवद्वचः। वाच्यस्याग्राम्यतायोर्निर्माधुर्य्यं दर्शितोरसः।